VSA
A Real English Medium School
Little Steps
Pre Primary wing of VSA

# VIDYA SHREE ACADEMY
## SR. SEC. SCHOOL
An English Medium Co.Ed. School | Science & Commerce
W : www.vsajaipur.com | E : vsajaipur@gmail.com M. : +91 9460356652, 8058999828
Add. : 84, Krishna Vihar, Behind Narayan Niwas, Gopalpura Bypass, Jaipur - 302015
/vsajaipur | /vsajaipur | /vidyashreeacademy | /vsa_jaipur

Class- 9 Sub-Sanskrit Reader Ch-3 Date:17-820

दिए गए कार्य को copy में पूर्ण करें l

तृतीयः पाठः

व्यायामः सर्वदा पथ्यः

अभ्यासः

1. एकपदेन उत्तरं लिखत —

(क) परमम् आरोग्यं कस्मात् उपजायते?

उत्तरम्→ व्यायामात् ।

(ख) कस्य मांसं स्थिरीभवति?

उत्तरम्→ व्यायामाभिरतस्य ।

(ग) सदा कः पथ्यः?

उत्तरम्→ व्यायामः ।

(घ) कैः पुंभिः सर्वेषु ऋतुषु व्यायामः कर्तव्यः?

उत्तरम्→ आत्महितैषिभिः ।

(ङ) व्यायामस्विन्नगात्रस्य समीपं के न उपसर्पन्ति?

उत्तरम्→ व्याधयः ।

maketoss.co

2. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत —

(क) कीदृशं कर्म व्यायामसंज्ञितम् कथ्यते?

उत्तरम् → शरीरायासजननं कर्म व्यायामसंज्ञितम् कथ्यते।

(ख) व्यायामात् किं किमुपजायते?

उत्तरम् → श्रमक्लमपिपासोष्ण - शीतादीनां सहिष्णुता आरोग्यं चापि परमं व्यायामात् उपजायते।

(ग) जरा कस्य सकाशं सहसा न समधिरोहति?

उत्तरम् → व्यायामिनः जनस्य जरा सकाशं सहसा न समधिरोहति।

(घ) कस्य विरुद्धमपि भोजनं परिपच्यते?

उत्तरम् → व्यायामं कुर्वतो नित्यं विरुद्धमपि भोजनम् परिपच्यते।

(ङ) कियता बलेन व्यायामः कर्तव्यः?

उत्तरम् → बलस्यार्धेन व्यायामः कर्तव्यः।

(च) अर्धबलस्य लक्षणम् किम्?

उत्तरम् → हृदिस्थानस्थितो वायुर्यदा वक्त्रं प्रपद्यते। व्यायामं कुर्वतो जन्तोस्तद्बलार्धस्य लक्षणम्।

3. उदाहरणमनुसृत्य कोष्ठकगतेषु पदेषु तृतीयाविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत–

यथा – व्यायामः ______ हीनमपि सुदर्शनं करोति (गुण)

व्यायामः गुणैः हीनमपि सुदर्शनं करोति।

(क) बलस्यार्धेन व्यायामः कर्तव्यः। (बलस्यार्ध)

maketoss.com

(ख) व्यायामेन सदृशं किञ्चित् स्थौल्यापकर्षणं नास्ति। (व्यायाम)

(ग) विद्यया बिना जीवनं नास्ति। (विद्या)

(घ) सः चरणेन खञ्जः अस्ति। (चरण)

(ङ) सूपकारः नासिकया भोजनं जिघ्रति। (नासिका)

4. स्थूलपदमाधृत्य प्रश्ननिर्माणं कुरुत —

(क) शरीरस्य आयासजननं कर्म व्यायामः इति कथ्यते।
उत्तरम् → कस्य आयासजननं कर्म व्यायामः इति कथ्यते?

(ख) अरयः व्यायामिनं न अर्दयन्ति।
उत्तरम् → के व्यायामिनं न अर्दयन्ति?

(ग) आत्महितैषिभिः सर्वदा व्यायामः कर्तव्यः।
उत्तरम् → कैः सर्वदा व्यायामः कर्तव्यः?

(घ) व्यायामं कुर्वतः विरुद्धं भोजनम् अपि परिपच्यते।
उत्तरम् → व्यायामं कुर्वतः कीदृशं भोजनम् अपि परिपच्यते?

(ङ) गात्राणां सुविभक्तता व्यायामेन संभवति।
उत्तरम् → केषाम् सुविभक्तता व्यायामेन संभवति?

(अ) षष्ठ श्लोकस्य भावमाश्रित्य रिक्तस्थानानि पूरयत —

यथा — गरुडस्य समीपे उरगाः न गच्छन्ति एवमेव व्यायामिनः जनस्य समीपं रोगाः न गच्छन्ति। व्यायामः वयोरूपगुणहीनम् अपि जनम् सुदर्शनम् करोति।

maketoss.com

5. 'व्यायामस्य लाभाः' इति विषयमधिकृत्य पञ्चवाक्येषु 'संस्कृतभाषया' एकम् अनुच्छेदं लिखत।

(अ) यथानिर्देशमुत्तरत —

(क) 'तत्कृत्वा तु सुखं देहम्' अत्र विशेषणपदं किम्?
उत्तरम् → सुखं।

(ख) 'व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः' अस्मिन् वाक्ये क्रियापदं किम्?
उत्तरम् → उपसर्पन्ति।

(ग) 'पुम्भिरात्महितैषिभिः' अत्र 'पुरुषैः' इत्यर्थे किं पदं प्रयुक्तम्?
उत्तरम् → पुम्भिः।

(घ) 'दीप्ताग्नित्वमनालस्यं स्थिरत्वं लाघवं मृजा' इति वाक्यात् 'गौरवम्' इति पदस्य विपरीतार्थकं पदं चित्वा लिखत।
उत्तरम् → लाघवं।

(ङ) 'न चास्ति सदृशं तेन किञ्चित् स्थौल्यापकर्षणम्' अस्मिन् वाक्ये 'तेन' इति सर्वनामपदं कस्मै प्रयुक्तम्?
उत्तरम् → व्यायामाय।

maketoss.com

**6.** (अ) निम्नलिखितानाम् अव्ययानाम् रिक्तस्थानेषु प्रयोगं कुरुत —

| सहसा, अपि, सदृशं, सर्वदा, यदा, सदा, अन्यथा |
|---|

(क) सर्वदा व्यायामः कर्तव्यः।

(ख) यदा मनुष्यः सम्यक्रूपेण व्यायामं करोति तदा सः सर्वदा स्वस्थः तिष्ठति।

(ग) व्यायामेन असुन्दराः अपि सुन्दराः भवन्ति।

(घ) व्यायामिनः जनस्य सकाशं वार्धक्यं सहसा नायाति।

(ङ) व्यायामेन सदृशं किञ्चित् स्थौल्यापकर्षणं नास्ति।

(च) व्यायामं समीक्ष्य एव कर्तव्यम् अन्यथा व्याधयः आयान्ति।

maketoss.com

**6.** (आ) उदाहरणमनुसृत्य वाच्यपरिवर्तनं कुरुत —

| कर्मवाच्यम् | | कर्तृवाच्यम् |
|---|---|---|
| यथा — आत्महितैषिभिः व्यायामः क्रियते | ⟶ | आत्महितैषिणः व्यायामं कुर्वन्ति। |
| (1) बलवता विरुद्धमपि भोजनं पच्यते। | ⟶ | बलवान् विरुद्धमपि भोजनं पचति। |
| (2) जनैः व्यायामेन कान्तिः लभ्यते। | ⟶ | जनाः व्यायामेन कान्तिं लभन्ते। |
| (3) मोहनेन पाठः पठ्यते। | ⟶ | मोहनः पाठं पठति। |
| (4) लतया गीतं गीयते। | ⟶ | लता गीतं गायति। |

maketoss.com

**7.** (अ) अधोलिखितेषु तद्धितपदेषु प्रकृतिं / प्रत्ययं च पृथक् कृत्वा लिखत —

| | | मूलशब्दः (प्रकृतिः) | | प्रत्ययः |
|---|---|---|---|---|
| (क) पथ्यतमः | = ⟶ | पथ्य | + | तमप्। |
| (ख) सहिष्णुता | = ⟶ | सहिष्णु | + | तल्। |
| (ग) अग्नित्वम् | = ⟶ | अग्नि | + | त्व। |
| (घ) स्थिरत्वम् | = ⟶ | स्थिर | + | त्व। |
| (ङ) लाघवम् | = ⟶ | लघु | + | अण्। |